इत्युक्तम् भा०आ०प० । एतासाञ्च चतुर्द्दशोत्पत्ति स्थानानि क दम्बर्य्यां वर्णितानि "यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्तीति तासां चतुर्द्दश कुलानि एकं भगवतः कमलयोनेर्म्मनसः समुत्पन्नम्, अन्यद्वेदेभ्यः सम्भूतम्, अन्यदग्नेरुद्भूतम् अन्यत् पवनात् प्रसूतम्, अन्यदमृतान्मथ्यमानादुत्थितम्, अन्यज्जलाज्जातम्, अन्यदर्ककिरणेभ्यो निर्गतम्, अन्यत् सोमरश्मिभ्यो निष्पतितम्, अन्यद्भूमेरुद्भूतम्, अन्यत् सौदामनीभ्यः प्रवृत्तम्, अन्यन्मृत्युना निर्म्मितम्, अपरं मकरकेतुना समुत्पादितम्, अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां सुतानां मध्ये द्वौ सुते सुनिररिष्टा च बभूवतुः, ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् एवमेतान्येकत्र चतुर्द्दश कुलानि" एतन्मूलं तु विस्तरभयान्नोक्तम् ।२दिशि ३ उपदिशि च तयोर्जलहेतुत्वात्तथात्वम् "पुञ्जिकास्थला च क्रतुस्थला चाप्सरसाविति" य० १५,१५, "पुञ्जिकास्थला क्रतुस्थला चाप्सरसौ दिगुपदिग्रूपे परिचारिके" इति वेददी० । "अप्सरसाविति दिक् च उपदिक् चाह" श्रुतेस्तथात्वम् । "मेनका वै अप्सराह्वयिणोति" भाष्यप्रयोगात् अप्सरसाविति श्रुति निर्द्देशाच्च नित्यबहुवचनान्ततेत्युत्सर्गः क्वचिदेकवचनान्तताऽपि

**अप्सरस्तीर्थ** त्रि० ६त० । १ तीर्थभेदे ।

**अप्सरा** स्त्री अप्सं रूपमस्त्यस्याः प्राशस्त्ये कुञ्जा०र । दिव्यरूपवत्यां स्वर्वेश्यायाम् "उद्भिन्दतीं संजयन्तीमप्सराम्" अ० ४,३८,१ ।

**अप्सरायमाणा** स्त्री अप्सरस इवाचरति देहसौन्दर्य्यादिना अप्सरस+क्यङ्-सलोपः कर्त्तरि शानच् । अप्सरस्तुल्य सौन्दर्य्यवत्यां स्त्रियाम् ।

**अप्सव** त्रि० अप्सं जलरसं वाति हिनस्ति वा—क६त० । जलरसशून्ये समुद्रे तस्य लवणजलत्वात्तथात्वम् । "ये अप्सवमर्णवं चित्रराधसस्तेनो रासन्ताम्" ऋ० १०,६५,३ ।

**अप्सव्य** पु० अप्सु भवः "अपोयोनियन्मतुपः" वार्त्ति० सप्तम्या अलुक्, यच्च । जलभवे ।

**अप्सस्** त्रि० अप्सु अप्साधने तेजसि सस्ति स्वपिति सस-क्विप् ७त० । १ रूपे तस्य तेजोहेतुत्वात् तथात्वम् २ रूपवति च । "शीर्ष्णा शिरोऽप्ससाप्सो अर्दयन्नंशून् बभस्ति हरितेभिरप्सभिः" अ० ६,४९,२, "जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः" ऋ० १,१२४,७ ।

**अप्सा** त्रि० अपोजलानि सनति ददाति सन—विट् । जलदातरि "आषाढं युत्सु पृतनासु पप्रिं स्वर्षामप्सामिति" ऋ० १,९१,२१, "अप्सां जलानां दातारम्" भा० । "पवस्व देवमादनो विचर्षणिरप्साः" ऋ० ९,८४ ।

**अप्सु** त्रि० नास्ति प्सु रूपम् (निरुक्तोक्तम्) यस्य । रूपरहिते "मा त्वा वयं सहसावन्नवीरा माप्सवः परि" ऋ०७,४,६, "अप्सवः रूपरहिताः" भा० । अप्राशस्त्ये न०ब० । अप्रशस्तरूपे असुरे, "अप्सुजितः" अप्सुजिच्छब्दे दृश्यम् ।

**अप्सुक्षित्** त्रि० अप्सु जलाधारे अन्तरिक्षे क्षियति निवसति—क्षि—क्विप् अलुक्स० । अन्तरिक्षवासिनि देवादौ "ये देवासो दिव्येकादश स्थ पृथिव्यामेकादश स्थ अप्सुक्षितो महिनैकादश ऋ० १,१३९,११, य० १८,९, च "तद्धेतुत्वात् तात्स्थ्यम् अप्सु अन्तरिक्षे क्षियन्ति निवसन्तीति" भा० । [ङीप् । जलचरे ।

**अप्सुचर** त्रि० अप्सु चरतीति चर—ट अलुक्समा० स्त्रियां

**अप्सुज** त्रि० अप्सु जले तद्धेतौ अन्तरिक्षे वा जायते जन—ड अलुक्स० । १जलजाते २अन्तरिक्षजाते "यदग्ने ! दिविजा अप्स्वप्सुजाः" इति ऋ० ८,४३,२८, "अप्सुजा अन्तरिक्षजाता" इति भा० ।

**अप्सुजा** पु० अप्सु—जायते जन+विट् अलुक्स० । अश्वे "अमृताबाष्पतो वह्नेर्वेदेभ्योऽण्डाच्च गर्भतः । साम्नोहयानामुत्पत्तिः सप्तधा परिकीर्त्तिता" इत्युक्तेस्तस्य बाष्पजातत्वात्तथात्वम् "संशितो अप्स्वप्सुजा ब्रह्मा सोम पुरोगवः" य० २३,१४, "अप्सुजा अश्व" इति वेददी० । २ वेतसे तस्य जलसमीपजातत्वात् तथात्वम् "अप्सुयोनिर्वा अश्वोऽप्सुजा वेतस" इति शत०ब्रा० । ३ जलजातमात्रे त्रि० ।

**अप्सुजित्** त्रि० अप्सून् असुरान् जयति जि—क्विप् अलुक्समा० । अन्तरिक्षस्थासुरजेतरि "सुपारः सुश्रवस्तमः समप्सुजितः" ऋ० ८,१३,२, "अप्सुजितः अन्तरिक्षवर्त्तमानानामसुराणां जेतारः" भा० ।

**अप्सुमत्** त्रि० अप्सु आपः जलानि सन्त्यस्य "अपोयोनियन्मतुपः" वार्त्ति० सप्तम्या मतुप् अलुक्स० च । १जलसंपृक्ते आधारज्यभागे । "अप्सुमन्तावाधाराज्यभागाविति" सि०कौ० । २यथेष्टं जलवत्यरि च "न ह्याप्सु मैत्यप्सुमान् भवति, छा०उप० । मरुस्थलीष्वपि यथेष्टोदकवान् भवतीति" आनन्दगिरिः ।

**अप्सुयोग** पु० ७त० अलुक्समा० । जलेषु योगे । "जिष्णवे योगायाप्सुयोगैर्वोयुनज्मि" अथ० १०,७,५ ।

**अप्सुयोनि** त्रि० अप्सु योनिरुत्पत्तिरस्य अलुक्समा० ।